# 11. पुष्पोत्सवः

---

**अभ्यासः**

**प्रश्न 1. वचनानुसारं रिक्तस्थानानि पूरयत (वचन के अनुसार रिक्त स्थानों की पूर्ति करें।)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| *यथा–* | मन्दिरे | मन्दिरयोः | मन्दिरेषु |
| | अवसरे | ................... | ................... |
| | ................... | स्थलयोः | ................... |
| | ................... | ................... | दिवसेषु |
| | क्षेत्रे | ................... | ................... |
| | ................... | व्यजनयोः | ................... |
| | ................... | ................... | पुष्पेषु |

**उत्तर:**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| अवसरे | **अवसरयोः** | **अवसरेषु** |
| **स्थले** | स्थलयोः | **स्थलेषु** |
| **दिवसे** | **दिवसयोः** | दिवसेषु |
| क्षेत्रे | **क्षेत्रयोः** | **क्षेत्रेषु** |
| **व्यजने** | व्यजनयोः | **व्यजनेषु** |
| **पुष्पे** | **पुष्पयोः** | पुष्पेषु |

**प्रश्न 2. कोष्ठकेषु प्रदत्तशब्देषु समुचितपदं चित्वा रिक्तस्थानानि पूरयत**
(कोष्ठकों में दिए गए शब्दों में उचित पद को चुनकर रिक्त स्थानों की पूर्ति करें)

(क) ................ बहवः उत्सवाः भवन्ति। (भारतम्/भारते)
(ख) ................... मीनाः वसन्ति। (सरोवरे/सरोवरात्)
(ग) जनाः ................... पुष्पाणि अर्पयन्ति। (मन्दिरेण/मन्दिरे)
(घ) खगाः .................. निवसन्ति। (नीडानि/नीडेषु)
(ङ) छात्राः ..................... प्रयोगं कुर्वन्ति। (प्रयोगशालायाम्/प्रयोगशालायाः)
(च) ................... पुष्पाणि विकसन्ति। (उद्यानस्य/उद्याने)

**उत्तरः**

(क) भारते बहवः उत्सवाः भवन्ति। ।
(ख) सरोवरे मीनाः वसन्ति।
(ग) जनाः मन्दिरे पुष्पाणि अर्पयन्ति।
(घ) खगाः नीडेषु निवसन्ति।
(ङ) छात्राः प्रयोगशालायाम् प्रयोगं कुर्वन्ति।
(च) उद्याने पुष्पाणि विकसन्ति।

**प्रश्न 3. अधोलिखितानि पदानि आधृत्य सार्थकानि वाक्यानि रचयत**
(निम्नलिखित पदों पर आधारित सार्थक वाक्यों की रचना करें)

| | | |
|---|---|---|
| वानराः | वनेषु | तरन्ति |
| सिंहाः | वृक्षेषु | नृत्यन्ति |
| मयूराः | जले | उत्पतन्ति |
| मत्स्याः | आकाशे | गर्जन्ति |
| खगाः | उद्याने | कूर्दन्ति। |

**उत्तरः**

| | | |
|---|---|---|
| वानराः | वृक्षेषु | कूर्दन्ति। |
| सिंहाः | वनेषु | गर्जन्ति। |
| मयूराः | उद्याने | नृत्यन्ति। |
| मत्स्याः | जले | तरन्ति। |
| खगाः | आकाशे | उत्पतन्ति। |

**प्रश्न 4. प्रश्नानाम् उत्तराणि लिखत (प्रश्नों के उत्तर लिखें)**
(क) जनाः पुष्पव्यजनानि कुत्र अर्पयन्ति?
(ख) पुष्पोत्सवस्य आयोजनं कदा भवति?
(ग) अस्माकं भारतदेशः कीदृशः अस्ति?
(घ) पुष्पोत्सवः केन नाम्ना प्रसिद्धः अस्ति?
(ङ) मेहरौलीक्षेत्रे कस्याः मन्दिरं कस्य समाधिस्थलञ्च अस्ति?

**उत्तरः**
(क) जनाः पुष्पव्यजनानि बख्तियारकाकी इत्यस्य समाधिस्थले अर्पयन्ति। ।
(ख) पुष्पोत्सवस्य आयोजनं अक्तूबरमासे भवति।

(ग) अस्माकं भारतदेशः उत्सवप्रियः अस्ति।
(घ) पुष्पोत्सवः 'फूलवालों की सैर' इति नाम्ना प्रसिद्धः अस्ति।
(ङ) मेहरौलीक्षेत्रे योगमायामन्दिरं बख्तियारकाकी इत्यस्य समाधिस्थलञ्च अस्ति।

**प्रश्न 5. कोष्ठकेषु दत्तेषु शब्देषु उचितां विभक्तिं प्रयुज्य वाक्यानि पूरयत**

(कोष्ठकों में दिए गए शब्दों में उचित विभक्ति का प्रयोग करके वाक्यपूर्ति करें)
यथा- सरोवरे मीनाः सन्ति। (सरोवर)
(क) ...................... कच्छपाः भ्रमन्ति। (तडाग)
(ख) ..................... सैनिकाः सन्ति। (शिविर)
(ग) यानानि ..................... चलन्ति। (राजमार्ग)
(घ) ..................... रत्नानि सन्ति। (धरा)
(ङ) बालाः ..................... क्रीडन्ति। (क्रीडाक्षेत्र)

**उत्तर:**
(क) तडागे कच्छपाः भ्रमन्ति।
(ख) शिविरे सैनिकाः सन्ति।
(ग) यानानि राजमार्गे चलन्ति।
(घ) धरायां रत्नानि सन्ति।
(ङ) बालाः क्रीडाक्षेत्रे क्रीडन्ति।

**प्रश्न 6. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत**

(मंजूषा से पदों को चुनकर रिक्त स्थानों की पूर्ति करें)
पुष्पेषु गङ्गायाम् विद्यालये वृक्षयोः उद्यानेषु

(क) वयं ..................... पठामः।
(ख) जनाः ..................... भ्रमन्ति ।
(ग) ............. नौकाः सन्ति।
(घ) ..................... भ्रमराः गुञ्जन्ति।
(ङ) ............ फलानि पक्वानि सन्ति।

**उत्तर:**
(क) वयं विद्यालये पठामः।
(ख) जनाः उद्यानेषु भ्रमन्ति।
(ग) गङ्गायाम् नौकाः सन्ति।

(घ) पुष्पेषु भ्रमराः गुञ्जन्ति।
(ङ) वृक्षयोः फलानि पक्वानि सन्ति।